International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(5): 112-115
© 2017 IJSR
www.anantaajournal.com
Received: 18-07-2017
Accepted: 19-08-2017

**नरेन्द्रकुमारपाण्डेय**
संस्कृतविभागः
गुरुकुलकांगडीविश्वविद्यालयः,
हरिद्वारम

Correspondence
**नरेन्द्रकुमारपाण्डेय**
संस्कृतविभागः
गुरुकुलकांगडीविश्वविद्यालयः,
हरिद्वारम

# श्रीमद्भगवद्गीतायां प्रबन्धनतत्त्वानि

**नरेन्द्रकुमारपाण्डेय**

**प्रस्तावना**

'प्रबन्धनम्' अर्थात (Management) इति। मानवजीवनं सुचारुरीत्या, अनुशासनबद्धरूपेण, शान्त्या संयमेन च प्रचलेत्, एतत्कृते नियमानां व्यवस्थापनं प्रबन्धनान्तर्गतमस्ति। प्रबन्धनस्य शोभननियमाः श्रीमद्भगवद्गीतायां सुचारुतया समुल्लिखिताः। तान् नियमान् अनुसृत्य जनाः शान्तया स्वजीवननिर्वाहं कर्तुं सक्षमाः भवन्ति। वस्तुतः मानवः सर्वप्राणिषु श्रेष्ठः अस्ति। कारणमस्ति अस्य यत् मानवेषु धर्मविशेषः भवत्येव। यथोल्लेखः वर्तते -

आहार निद्रा भयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥ [1]

'धर्मः' मनुष्याणां जीवनस्याधारः प्राणभूतश्चास्ति। श्रीमद्भगवद्गीतायाः प्रारम्भः धर्मशब्दाद् एवास्ति। यथा -

'धर्मक्षेत्रे कुरुक्षेत्रे समवेताः युयुत्सवः'। [2]

मानवानां हृदये धर्मस्य संस्थापनार्थाय भगवान् अपि सन्नद्धः भवति। गीतायां तु अस्योल्लेखोऽपि वर्तते। यथा -
'धर्मसंस्थापनार्थाय सम्भवामि युगे युगे'॥ [3]

मानवजीवनस्य सुचारुतायै अभ्युदयहेतवे च सुचारुजीवनप्रबन्धनस्यावश्यकता वर्तते। अस्य कृते सदाचारस्य परिपालनमावश्यकमेव। अथर्ववेद त्वल्लेखः वर्तते -
'यत् तपसा, ब्रह्मचर्येण देवः मृत्युमुपाघ्नत'। [4]

ब्रह्मचर्यं तु सदाचरणमेवास्ति। सदाचारेण सत्येन वा जीवने सुचारुता आयाति आत्मज्ञानं च भवति। यथोक्तम् -

सत्येन लभ्यस्तपसा ह्येष आत्मा।
सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्॥ [5]

'सत्यमेवधर्मः' इति अस्ति। मानवजीवनस्य लक्ष्यं 'पुरुषार्थश्चतुष्टयप्राप्तिः', इति विश्रुतमेव। पुरुषार्थचतुष्टये 'धर्मः' प्रथमः वर्तते। सत्यधर्मयोः ज्ञानम् अत्यावश्यकमस्ति। मानवजीवनस्य सुचारुप्रबन्धनमनेनैवास्ति। धर्मस्य स्वरूपं विविधेषु ग्रन्थेषु प्रतिपादितं वर्तते -

आहुः सत्यं हि परमं धर्मं धर्मविदो जनाः। [6]
सत्मेकपदं ब्रह्म, सत्ये धर्मः प्रतिष्ठितः। [7]
धर्मो न वै यत्र न चास्ति सत्यं। [8]
सत्यं धर्मं विदुः बुधाः।
सत्यान्नृते न धर्मः।
धर्म न दूसर सत्य समाना। [9]
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः। [10]
इज्याध्ययनदानानि तपः सत्यं क्षमादमः।

अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः। [11]

यतोऽभ्युदयनिः श्रेयस्साधिगमः स धर्मः। [12]
श्रूयतां धर्मसर्वस्वं श्रुत्वाचाप्यवधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥[13]
धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥ [14]
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चमुर्विधं प्राहुः साक्षात् धर्मस्य लक्षणम्॥ [15]
आचारः परमो धर्मः। [16]

श्रीमद्भगवद्गीतायां भगवत्शरणमेव सर्वोत्तमः धर्मः कथितः। यथा –

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ [17]

स्पष्टमस्ति यत् सुचारुमानवजीवनप्रबन्धनार्थाय सदाचारः तु श्रेष्ठः आधारः, अतः परं भगवत्-शरणम्। श्रीमद्भगवद्गीतायां मानजीवनप्रबन्धनविषये विशदं व्यावहारिकं चिन्तनं प्रस्तुतम्। सुष्ठु जीवनप्रबन्धनार्थं जनस्तु विषादरहितः भवेत्। गीतायाः प्रथमोऽध्यायः 'विषादयोग' इतिनाम्ना वर्तते। विषादेन हृदये दौर्बल्यं प्रभवति। अर्जुनं विषादत्यागाय उत्प्रेरयन् श्रीकृष्णः कथयति, यत् –

क्लैब्यं मास्मगमः पार्थ, नैतत्वय्युपपद्यते।
क्षुद्रं हृदयदौर्वल्यं त्यक्त्वोत्तिष्ठ, परन्तप॥ [18]

विषादरहितः जनः रागद्वेषविमुक्तः भवति तथा च प्रसादेनैव सर्व-दुखानां निराकृतिः भवति। यथोक्तम् –

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते॥ [19]

अनेन स्पष्टमस्ति, यत् स्वस्थजीवनप्रबन्धनाय प्रसादः श्रेष्ठसंसाधनमस्ति। प्रश्नस्तु उद्भवति यत् कीदृशं जीवनं सफलं भवति ? उत्तरं सुस्पष्टमस्ति यत् यत्र शान्तिः समुन्नचिश्च तज्जीवनं सार्थकम्। शान्तिपूर्णजीवनार्थाय सुष्ठु प्रबन्धनम् आवश्यकम्। अस्य सिद्धये जनः निष्कामः भवेत्। यथा गीतायां निगदितम् –

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।
निर्ममो निरहंकारः स शान्तिमधिगच्छति॥ [20]

सार्थक जीवनार्थय तस्य प्रबन्धनमपि सुचारु भवेत्। अस्य कृते गीताकारः जनैः सह 'योगं' योजयति। गीतायां त्रियोगाः वर्णिताः – ज्ञानयोगः, कर्मयोगः, भक्तियोगश्च। योगस्यविषये गीतायां निगदितम् –

समत्वं योग उच्यते। [21]
योगः कर्मसु कौशलम्। [22]
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥ [23]

सर्वेषु योगेषु कर्मयोगः श्रेयस्करः वरीयश्चास्ति। योगनिष्ठां सांख्यनिष्ठां च जनस्तु अकर्मणा न प्राप्नोति। विषयेऽस्मिन् गीतायां स्पष्टं कृतं यत् –

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽनुते।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति॥ [24]

जीवनस्य सुष्ठु संचालनाय शोभनप्रबन्धनाय वा कर्मणां त्वावश्यकता गीतायां निरूपिताऽस्ति। यथा –

नियतं कुरु कर्म त्वं कर्मज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥ [25]

कर्मणैव हि जीवनस्य सुचारुप्रबन्धनं भवति, सिद्धिं ननु कर्मणैव प्राप्नोति जनः। यथा कथितम् –

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि॥ [26]

अत्र कर्मविधिः गीताकारेण स्पष्टी कृतः, यत् कार्यकर्म एव करणीयम् नन्वस्ति, नान्यम्। यथा –

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स सन्यासी च योगी च न निरग्निर्न चाक्रियः॥ [27]

'कार्यकर्म' सुचारुजीवनप्रबन्धनस्य मूलाधारः वर्तते। अनेनैव अनुशासितं जीवनं भवति। अनुशासनेन संयमेन वा जीवनं निष्कण्टकं निरापदं वा भवति। अनेनैव योगसिद्धिं लभते जनः। श्रीमद्भगवद्गीतायां मानवजीवनप्रबन्धनस्य नियमाः सन्ति –

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥ [28]

अन्यत्रापि उल्लेखः वर्तते यत् कार्यकर्मयोगेन ब्रह्मचर्येण सत्येन वा जनः मृत्युञ्जयः भवति। यथा –

ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत। [29]

सुचारुजीवनस्य प्रबन्धनमन्त्राः सूत्राणि नियमाः वा गीतायां निगदिताः। ते नियमास्तु सुकराः सरलाश्च सन्ति, यथा - सन्मार्गं प्रति प्रचलेत्, कार्यं कर्म कुर्यात्, प्रसादं तु अधिगच्छेत्, भयरहितः भवेत् इत्यादयः जिज्ञासा ननु वर्तन्ते, अत्र यव का बाधा प्रभवति, यया जीवनं विशृङ् खलतां याति तथा जनः विषादमनुभवति। गीता सु अस्मिन् विषये उत्तरं प्रददाति, यत् स्वार्थवृत्तिः कामः क्रोधश्च अत्र बाधां जनयन्ति। यथोक्तम् -

भुञ्जते ते त्वधं पापा ये पचन्त्यात्मकारणात्। [30]

अपि च -

काम एष क्रोधं एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥ [31]

मानवजीवने सुप्रबन्धनं यदि भवति, तर्हि जनः सर्वं यथोचितम् अभीष्टं प्राप्नोति। सुचारुशरीरयात्रायां तदा कापि बाधा न उद्भवति। यथा वर्णितमेव -

नियतं करु कर्म त्वं कर्मज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥ [32]

गीतायां कर्मविधिः निगदिता यत् कर्मकरणे योगस्थितिः भवेत् तथा च आसक्ति भावः त्याज्यः भवेत्। यथोल्लेखः वर्तते, यत्

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय। [33]

तथा च -

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥ [34]

सुचारुजीवनप्रबन्धनस्य घटकमेकं 'स्थितप्रज्ञतास्ति'। स्थितप्रज्ञयता द्वन्द्वरहितः जनः भवति, जीवने शान्तिं च अनुभवति। यथोक्तम् -

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥ [35]

गीता निर्दिशति यत् जीवनस्य सुप्रबन्धनाय करणीयं कर्म एव आचरणीयम्। तत्रैव मनुष्यस्य अधिकारः वर्तते। कर्मानुसारेण फलं तु सुनिश्चितमेव, अत एव फलासक्तिः कदापि न कर्तव्या। यथा कथितम् -

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥ [36]

श्रीमद्भगवद्गीतायाः षोडशेऽध्याये दैवासुरसम्पद्विभागयोगः वर्तते। तत्र वर्णिताः दैवीसम्पदः सुचारुजीवनप्रबन्धनस्य सुमन्त्राः सन्ति। षड्विंशतिदैवीगुणाः तु अत्र निगदिताः, ते तु सुचारु मानवजीवनप्रबन्धनस्य उपयोगिघटकाः सन्ति। यथा -

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।।
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥
तेजः क्षमाधृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं दैवीमभिजातस्य भारत॥ [37]

अत्र षड्विंशतिदैवीगुणेषु 'सत्यम्' इति सदाचारणं प्रति प्रेरयति। अस्याधीनाः सर्वे गुणाः सन्ति। मानवजीवनस्य सुप्रबन्धनस्य सत्यगुणस्तु आत्मा एवास्ति। सत्यं तु जगदाधारस्य सर्वेश्वरस्य परमात्मनः स्वरूपमस्ति। यथा भागवतमाहात्म्ये उल्लिखितम् यत् -

सच्चिदानन्दरूपाय विश्वोत्पत्यादिहेतवे।
तापत्रयविनाशाय श्रीकृष्णाय वयं नुमः॥
श्रीमद्भागवते एवमपि निर्दिष्टं यत् -
सत्यं परं धीमहि। [38]

अन्यत्रापि सत्यस्य महिमा, जीवने सत्यस्य अनिवार्यता वा वर्णिता। यथा -

सत्येन लभ्यस्तपसा ह्येष आत्मा।
सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्॥ [39]

गीतायामपि एवमेव निगदितम्, यत् -

यदिच्छन्तो ब्रह्मचर्य चरन्ति।
तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये॥ [40]

'ब्रह्मचर्यम्' इति शब्दस्य अर्थस्तु सदाचरणमेवास्ति सत्यं वा इत्यस्ति। अन्यत्रापि वर्णितं यत् -

'सत्यं चेत् तपसा च किम्'। [41]

तथा च -

अश्वमेधसहस्राणि सत्यं च तुलयाधृतम्।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते॥

निष्कर्षरूपेण श्रीमद्भगवद्गीतायां मानवजीवनस्य सुप्रबन्धनस्य त्रीणि उपयोगि सूत्राणि प्रस्तुतानि - विनम्रता, जिज्ञासा, ज्ञानार्जनं वा, सेवाभावना (सत्यकर्मनिष्ठा) च। यथोल्लेखः -

तद्धि प्रणिपातेन परिप्रश्नेन सेवया। [42]

श्रीमद्भगवद्गीता मानवजीवनस्य उत्कृष्टं श्रेष्ठं च संविधानमस्ति। अत्र सफलमानवजीवनस्य प्रबन्धनसूत्राणि मानवसमाजहितार्थं सुनिहितानि। तानि तु आचरणीयानि। अस्तु कथनमिदं समीचीनमेवास्ति -

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।

## संधर्व सूची


1. हितोपदेशः
2. गीता - १/१
3. गीता - ४/८
4. अथर्ववेद - ११/७/१९
5. मुण्डक - उप. - ३/१/५
6. वा. रा. - २/१४/३
7. वा. रा. - २/१४/७
8. वा. रा. (उत्तरकाण्ड)
9. रामचरितमानस - २/९४/५
10. पञ्चतन्त्रम्
11. पञ्चतन्त्रम्
12. योगशास्त्र
13. महाभारत
14. मनुस्मृति - ६/९२
15. मनुस्मृति - २/१२
16. मनुस्मृति - १/१०८
17. गीता - १८/६६
18. गीता - २/३
19. गीता - २/६४
20. गीता - २/७१
21. गीता - २/४८
22. गीता - २/५०
23. गीता - ६/१७
24. गीता - ३/४
25. गीता - ३/८
26. गीता - ३/२०
27. गीता - ६/१
28. गीता - ६/१७
29. अथर्ववेद - ११/७/१९
30. श्रीमद्भगवद्गीता - ३/१३
31. गीता - ३/३७
32. गीता - ३/८
33. गीता - २/४८
34. गीता - २/३८
35. गीता - २/५६
36. गीता - २/४७
37. गीता - १६/१, २, ३
38. श्रीमद्भागवत - १/१/१
39. मुण्डक-उपनिषद् - ३/१/५
40. गीता - ८/११